॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ५४

स ननाद महानादं समुद्रमभिनादयन् ।
जनयन्निव निर्घातान्विधमन्निव पर्वतान् ॥ १॥

तमवध्यं मघवता यमेन वरुणेन च ।
प्रेक्ष्य भीमाक्षमायान्तं वानरा विप्रदुद्रुवुः ॥ २॥

तांस्तु विद्रवतो दृष्ट्वा वालिपुत्रोऽङ्गदोऽब्रवीत् ।
नलं नीलं गवाक्षं च कुमुदं च महाबलम् ॥ ३॥

आत्मानमत्र विस्मृत्य वीर्याण्यभिजनानि च ।
क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा ॥ ४॥

साधु सौम्या निवर्तध्वं किं प्राणान्परिरक्षथ ।
नालं युद्धाय वै रक्षो महतीयं विभीषिकाः ॥ ५॥

महतीमुत्थितामेनां राक्षसानां विभीषिकाम् ।
विक्रमाद्विधमिष्यामो निवर्तध्वं प्लवङ्गमाः ॥ ६॥

कृच्छ्रेण तु समाश्वास्य सङ्गम्य च ततस्ततः ।
वृक्षाद्रिहस्ता हरयः सम्प्रतस्थू रणाजिरम् ॥ ७॥

ते निवृत्य तु सङ्क्रुद्धाः कुम्भकर्णं वनौकसः ।
निजघ्नुः परमक्रुद्धाः समदा इव कुञ्जराः ।
प्रांशुभिर्गिरिशृङ्गैश्च शिलाभिश्च महाबलाः ॥ ८॥

पादपैः पुष्पिताग्रैश्च हन्यमानो न कम्पते ।
तस्य गात्रेषु पतिता भिद्यन्ते शतशः शिलाः ।
पादपाः पुष्पिताग्राश्च भग्नाः पेतुर्महीतले ॥ ९॥

सोऽपि सैन्यानि सङ्क्रुद्धो वानराणां महौजसाम् ।
ममन्थ परमायत्तो वनान्यग्निरिवोत्थितः ॥ १०॥

लोहितार्द्रास्तु बहवः शेरते वानरर्षभाः ।
निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः ॥ ११॥

लङ्घयन्तः प्रधावन्तो वानरा नावलोकयन् ।
के चित्समुद्रे पतिताः के चिद्गगनमाश्रिताः ॥ १२॥

वध्यमानास्तु ते वीरा राक्षसेन बलीयसा ।
सागरं येन ते तीर्णाः पथा तेनैव दुद्रुवुः ॥ १३॥

ते स्थलानि तथा निम्नं विषण्णवदना भयात् ।
ऋक्षा वृक्षान्समारूढाः के चित्पर्वतमाश्रिताः ॥ १४॥

ममज्जुर्णवे के चिद्गुहाः के चित्समाश्रिताः ।
निषेदुः प्लवगाः के चित्के चिन्नैवावतस्थिरे ॥ १५॥

तान्समीक्ष्याङ्गदो भङ्गान्वानरानिदमब्रवीत् ।
अवतिष्ठत युध्यामो निवर्तध्वं प्लवङ्गमाः ॥ १६॥

भग्नानां वो न पश्यामि परिगम्य महीमिमाम् ।
स्थानं सर्वे निवर्तध्वं किं प्राणान्परिरक्षथ ॥ १७॥

निरायुधानां द्रवतामसङ्गगतिपौरुषाः ।
दारा ह्यपहसिष्यन्ति स वै घातस्तु जीविताम् ॥ १८॥

कुलेषु जाताः सर्वे स्म विस्तीर्णेषु महत्सु च ।
अनार्याः खलु यद्गीतास्त्यक्त्वा वीर्यं प्रधावत ॥ १९॥

विकत्थनानि वो यानि यदा वै जनसंसदि ।
तानि वः क्व च यतानि सोदग्राणि महान्ति च ॥ २०॥

भीरुप्रवादाः श्रूयन्ते यस्तु जीवति धिक्कृतः ।
मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम् ॥ २१॥

शयामहे वा निहताः पृथिव्यामल्पजीविताः ।
दुष्प्रापं ब्रह्मलोकं वा प्राप्नुमो युधि सूदिताः ।
सम्प्राप्नुयामः कीर्तिं वा निहत्य शत्रुमाहवे ॥ २२॥

न कुम्भकर्णः काकुत्स्थं दृष्ट्वा जीवन्गमिष्यति ।
दीप्यमानमिवासाद्य पतङ्गो ज्वलनं यथा ॥ २३॥

पलायनेन चोद्दिष्टाः प्राणान्रक्षामहे वयम् ।
एकेन बहवो भग्ना यशो नाशं गमिष्यति ॥ २४॥

एवं ब्रुवाणं तं शूरमङ्गदं कनकाङ्गदम् ।

द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितम् ॥ २५ ॥

कृतं नः कदनं घोरं कुम्भकर्णेन रक्षसा ।
न स्थानकालो गच्छामो दयितं जीवितं हि नः ॥ २६ ॥

एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः ।
भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः ॥ २७ ॥

द्रवमाणास्तु ते वीरा अङ्गदेन वलीमुखाः ।
सान्त्वैश्च बहुमानैश्च ततः सर्वे निवर्तिताः ॥ २८ ॥

ऋषभशरभमैन्दधूम्रनीलाः
कुमुदसुषेणगवाक्षरम्भतारा: ।
द्विविदपनसवायुपुत्रमुख्यास्
त्वरिततराभिमुखं रणं प्रयाताः ॥ २९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com